Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ पुलिन्दिनीमन्त्रः —

शङ्कर ऋषिः । जगती छन्दः । पुलिन्दिनी देवता । ई बीजम् । स्वाहा शक्तिः । प्रसादे० । ई इत्यनेन करन्यासः । तेनैव षडङ्गं च ।

बर्हावतंसाभिरामचिकुरां बिम्बोज्ज्वलच्चन्द्रिकां
गुञ्जाहारलतांशुजालविलसद्ग्रीवामधीरेक्षणाम् ।
माकन्दद्रुमपल्लवारुणपदामर्धेन्दुबिम्बाननां
देवीं दिव्यभर्यां प्रसन्नहृदयां ध्यायेत्किरातादृताम् ॥

ई ओं नमो भगवति [1]श्रीं शारदादेवि अत्यन्तातुलभोज्यं देहि देहि एह्यागच्छागच्छ गन्तुकं हृदिस्थं कार्यं सत्यं ब्रूहि सत्यं ब्रूहि पुलिन्दिनि ई [2]स्वाहा ५४ पञ्चाशत् शतमात्रं जपः ॥

कार्याकार्यविवेकाभ्यां (थं) नित्यमष्टोत्तरं शतम् ।
जप्त्वा शयीत यस्तस्य स्वप्ने वदति साम्बिका ॥

साधकस्तद्वचः श्रुत्वा तथैवान्वहमाचरेत् ।
तस्य नास्ति भयं क्वापि सार्वकालं सुखी भवेत् ॥

---

२. ई ओं नमो भगवति श्रीशारदा देहि अत्यन्तातुलभोज्यं देहि देहि एह्येह्या-गच्छागच्छागन्तुकं कार्यं सत्यं ब्रूहि ब्रूहि पुलिन्दिनि ई स्वाहा । इति पञ्चाशदर्णः प्रसिद्धः ।